तेज बन्नेनो (केटलोक) समय गयाबाद तेजने (पूर्वे) करेलां पुण्यना प्रभावथी धर्मदत्त ना-
मे पुत्र थयो. ॥ ८ ॥ उमरलायक थये छते पिताए तेने भणावीने श्रीशेषशेठनी उत्तम रूपवा-
ळी सुरूपा नामनी पुत्रीसाथे परणाव्यो. ॥ ९ ॥ पितानी महेरबानीथी घरना व्यापाररूपी समुद्रने
कांठे बेठेलो एटले घरकामनी अंदर ध्यान आपवानी जरुरतविनानो ते धर्मदत्त ते स्त्रीसाथे ह-
मेशां एश माणवा लाग्यो. ॥ १० ॥ एकदिवसे आकाशगंगानां मोजांसरखां (अति उज्ज्वल)

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

अन्यदा स्वःसरिद्वीची—समे संवीय वाससी ॥ पुण्यद्रोः पक्किमफलैः । शोभितः स्वर्णभूषणैः ॥
॥ ११ ॥ वक्रस्वभावया शश्व–दध्यापित इव श्रिया ॥ कुर्वन् वक्रक्रमन्यासं । स चचार चतुष्पथे ॥
॥ १२ ॥ युग्मं ॥ तं गंधमृगवद्वीक्ष्य । सारसौगंध्यबंधुरं ॥ कः प्राणायामकारीव । नोर्ध्वश्वासो ज-
नोऽजनि ॥ १३ ॥ केचिदूचुरहो अस्य । भाग्यं सौभाग्यशालिनः ॥ जन्मना यन्मनुष्योऽपि । भा-
ति देव इव श्रिया ॥ १४ ॥ अपरे स्माहुरेतस्य खलु कृत्वाऽप्रशंसनं ॥ यः पित्रा स्वीकृतां लक्ष्मीं

---

वस्त्रो पहेरीने तथा पुण्यरूपी वृक्षनां पाकेलां फलसरखां स्वर्णनां आभूषणोथी शोभायुक्त थइने
॥ ११ ॥ हमेशां वक्रस्वभाववाळी लक्ष्मीए जाणे भणावेलो होय नहि तेम वांका वांका पगलां
मुकतोथको ते चहुटामां चालवा लाग्यो. ॥ १२ ॥ कस्तूरीयां हरिणनीपेठे उत्तम सुगंधिथी मनो-
हर बनेला एवा तेने जोइने जाणे प्राणायाम करतो होय नहि तेम कयो माणस ऊर्ध्वश्वास-
वाळो न थयो? ॥ १३ ॥ केटलाको कहेवा लाग्या के अहो! आ सौभाग्यवान धर्मदत्तनुं केवुं
( उमदुं ) नशीब छे! के जे जन्मथी मनुष्य छतां पण लक्ष्मीथी देवसरखो शोभे छे. ॥ १४ ॥
केटलाको तेनी निंदा करीने कहेवा लाग्या के अरे! आ तो पिताए स्वीकारेली ( पोतानी )

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। भुनक्ति जननीमिव ॥ १५ ॥ प्रशस्यस्तात एवास्य । य एवं क्षमते व्ययं ॥ बुधो विधोरिव क्ली-
वः । पुत्रोऽपि स्यादरिः पितुः ॥ १६ ॥ एवं जनाननान्नाना—लापं श्रुत्वा स दध्यिवान् ॥ परोक्त-
मेषु पूर्वोक्ता—न्मान्यं व्याकरणेष्विव ॥ १७ ॥ सत्यवादिषु कः कोपः । सत्यवादी हि दुर्लभः ॥
जानेऽहमपि न न्याय्यो । यूनां पितृधनव्ययः ॥ १८ ॥ व्ययीत वित्तवं पैत्र्यं । कुणिः पंगुर्भवेद्यदि
॥ अन्यथा दुर्यशोवल्ल्यं—क्रूरावेव करौ क्रमौ ॥ १९ ॥ एवं विकल्पदुर्वात—क्षुब्धे तच्चित्तवारि-

---

मातासरखी लक्ष्मीने भोगवे छे. ॥ १५ ॥ धन्य छे एना पिताने के जे तेनुं आवीरीतनुं उडाउ-
पणुं सहन करे छे, चंद्रनो जेम बुध तेम अकर्मी पुत्र पण पितानो वैरी थाय छे. ॥ १६ ॥ एवी
रीते लोकोना मुखथी नानाप्रकारनां वचनो सांभळीने ते धर्मदत्त विचारवा लाग्यो के जेम व्या-
करणमां तेम ( अहिं पण ) प्रथम मनुष्यना वचन करतां पाछळना मनुष्यनुं वचन मानवालाय-
क छे. ॥ १७ ॥ वळी सत्यवादीउप्रते कोप करवो शा कामनो छे? केमके सत्य कहेनार दुर्लभ
होय छे, तेम हुं पण जाणुं छुं के उमरलायक पुत्रे पितानुं धन उडाववुं ए योग्य नथी. ॥१८॥
पुत्र जो लुलो अथवा पांगळो होय तो ते भले पिताए उपार्जन करेलुं धन खरचे, परंतु जो तेम

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

धौ ॥ धनार्जनाशाकल्लोलै—रुद्धतैर्व्यानशे जगत ॥ २० ॥ अथागत्य निजं धाम । पितरं स व्य-
जिज्ञपत ॥ दूरदेशांतरं गंतु—कामः कामनया श्रियः ॥ २१ ॥ वारितोऽपीति पित्रासौ । न जहौ
निजमाग्रहं ॥ भृशायंते निषिद्धेऽर्थे । युवानो ह्यातुरा इव ॥ २२ ॥ संगृह्य सांम्सारं स । लक्ष्मी-
लाभायलंपकः ॥ जवाद्विवाहकारी वा—ऽस्तोकं लोकममेलयत ॥ २३ ॥ सुरूपा तमथैकांते । कां-

न होय तो तेना हाथपग अपयशरूपी वेलडीना अंकुरासमान जाणवा. ॥ १९ ॥ एवी रीतनां विकल्पोरूपी तोफानी पवनथी तेनो मनरूपी समुद्र डोलायमान थयो, तथा तेमां उछळेलां धन कमावानी आशारूपी मोजांओ समस्त जगतमां व्यापी गयां. ॥ २० ॥ हवे ते पोताने घेर आवीने पिताने कहेवा लाग्यो के हे पिताजी धन कमावानी इच्छाथी हुं दूरदेशांतरमां जवा चाहुं छुं. ॥ २१ ॥ त्यारे पिताए निवार्या छतां पण तेणे पोतानो आग्रह छोड्यो नही, केमके युवको आतुरनी पेठे निषेधेलुं कार्य करवाने वधारे हठ करे छे. ॥ २२ ॥ विवाह करनारनीपेठे धन मेळववामाटे आतुर बनीने सर्व सरंजाम एकठो करीने तेणे त्यां घणा लोकोने भेगा कर्या. ॥ २३ ॥ हवे सुरूपाए तेने एकांते मनोज्ञ वचनथी कह्युं के, हे स्वामी! हुं पण खरेखर तमारी साथे आ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेन वचसा जगौ ॥ त्वया समं समेष्यामि । स्वामिन्नहमपि ध्रुवं ॥ २४ ॥ मावादीस्त्वं विमुग्धासि । लोको वैदेशिकः शठः ॥ शिरीषसुकुमारांगी । त्वं च पंथा सुदुःकरः ॥ २५ ॥ एवं भर्त्रा निषिध्धापि । साऽमुंचन्न कदाग्रहं ॥ वारयामासतुर्युक्त्या । ततस्तां श्वसुरावपि ॥ २६ ॥ कथंचनाप्यनुत्सृष्टा–ग्रहामात्तव्रतामिव ॥ पत्नीं प्रीत्या सहादाया–ऽनलसः प्रचचाल सः ॥ २७ ॥ तया दयितयाधिष्ठय—धृतिं मार्गेऽपि लंभितः ॥ प्रियजानिः प्रयाणानि । ददौ कतिपयानि सः ॥ २० ॥ पथ्यस्य

---

वीश. ॥ २४ ॥ ( त्यारे धर्मदत्ते तेणीने कह्युं के ) हे प्रिये! आ बाबतमां तुं कंइं बोलीश नहि, तुं तो नोळी बे, परदेशी लोको लुचा होय बे, वळी तुं सरसवना पुष्पसरखी सुकुमाल शरीरवाळी बे, अने देशाटन करवुं कंइं सहेलुं नथी. ॥ २५ ॥ एवी रीते भर्तारे निषेध्या बतां पण तेणीए ज्यारे कदाग्रह तज्यो नहि, त्यारे युक्तिपूर्वक सासुससराए पण तेणीने निवारी ॥ २६ ॥ जोगणनीपेठे कोइ पण रीते आग्रह न तजवाथी प्रीतिपूर्वक तेणीने साथे लेइने ते आलस तजीने चालतो थयो. ॥ २७ ॥ एवी रीते प्रीतिना वशथी साथे लेवाथी मार्गमां हरकत पमवा बतां पण तेणे केटलीक मजलो करी. ॥ २० ॥ राजानीपेठे लोकोने लेइने चालता एवा ते धर्मदत्तने मा·

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पार्थिवस्येव । संवाह्य नयतो जनं ॥ विप्रो वररुचिर्नाम । धीधाम समगच्छत ॥ २९ ॥ समं तेन प्रियालापैः । पीयूषास्वादसोदरैः ॥ पद्मनालमिवांभोभि-स्तस्य मैत्र्यमवर्धत ॥ ३० ॥ सखायं सुखमत्येतुं । मार्गमेकरथस्थितं ॥ कथामवितथामेकां । विप्रं पप्रछ सोऽन्यदा ॥ ३१ ॥ सोऽप्यूचे मित्र संजात—स्तव तावत्कथारसः ॥ रसिकस्य हि कार्पण्यं । न कामिन इवोचितं ॥ ३२ ॥ दीनाराणांमदीनास्य । देहि पंचशतानि मे ॥ यथाऽपूर्वकथास्वाद—कौतुकं पूरयामि ते ॥ ३३ ॥ सोऽपि त-

---

गमां वररुचि नामना एक महाबुद्धिवान ब्राह्मणनो मेलाप थयो. ॥ २९ ॥ तेनी साथे थयेला अमृतना स्वादसरखा मिष्ट वचनोथी जेम जलवडे करीने कमलनी नाल तेम तेनी मित्राइ वृद्धि पामी. ॥ ३० ॥ विनोदपूर्वक मार्ग उलंगवामाटे एकज रथमां बेठेला एवा ते ब्राह्मणप्रते तेणे एक दिवसे एक वार्ता पूछी. ॥ ३१ ॥ त्यारे ते ब्राह्मणे पण तेने कह्युं के, हे मित्र तने हवे कथानो रस लाग्यो छे, माटे कामीनीपेठे रसिकने कृपणपणुं राखवुं ए उचित नही. ॥ ३२ ॥ माटे हे तेजस्वी मुखवाळा! तुं मने पांचसो सोनामहोरो आप? के जेथी तारुं अपूर्व कथाना स्वादनुं कौतुक हुं संपूर्ण करुं. ॥ ३३ ॥ ( ते सांभळी ) ते धर्मदत्त पण तेने तुरत पांचसो सोनामहोरो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्मै ददौ मंक्षु । दीनारशतपंचकं ॥ न बाहुबलिनो द्रव्यं । व्ययतः शंकते मनः ॥ ३४ ॥ अथ सो-
ऽकथयत्तस्मै । कथामिति मिताक्षरां ॥ न नीचजनसंपर्कः । कार्यः स्वहितमिच्छता ॥ ३५ ॥ ततः
किमिति तेनोक्तो—ऽवादीदहसनो द्विजः ॥ धीमन्नियमियत्येव । कथास्त्यथ स ऊचिवान् ॥ ३६ ॥
भोः किमेतत्त्वया प्रोक्तं । बालानामपि हास्यकृत् ॥ मम त्वमुत्तमर्णीव । मुधैव धनमग्रहीत् ॥ ३७ ॥
अपूर्वगोरससाकांक्षा—ऽस्त्यद्यापि मम तादृशी ॥ उत्पन्ना च विलीना च । कथमेषा कथागवी ॥ ३८ ॥

---

आपी, केमके भुजाबलवाळानुं मन धन खरचतां शंका पामतुं नथी. ॥ ३४ ॥ पछी ते ब्राह्मणे पण तेने आवी रीतनी एक टुंकाक्षरी कथा कही के, पोतानुं हित इच्छनारे नीच माणसनो संग करवो नही. ॥ ३५ ॥ पछी शुं? एम धर्मदत्ते पूछवाथी ते ब्राह्मण भारे महोडुं राखीने बोल्यो के हे बुद्धिवान्! आ कथा एटलीज हती, त्यारे वळी ते बोल्यो के ॥ ३६ ॥ अरे! बालकोने पण हसवुं आवे एवुं आ तुं शुं बोल्यो? खरेखर तें लेणीयातनीपेठे मारुं धन फोकट लेइ लीधुं. ॥ ॥ ३७ ॥ अपूर्व वचनरस ( गोरस ) चाखवानी मारी इच्छा तो हजु पण तेवीने तेवीज रही छे, माटे आ तारी कथारूपी गाय ते केवी! के जे जन्म्या भेळीज नाश पामी! ॥ ३८ ॥ एवी रीते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्यार्त्तं तं द्विजः प्रोचे । मा शुचः कथयाल्पया ॥ अल्पापीयं कथा मित्र । लोकद्वयसुखावहा ॥ ॥ ३९ ॥ पुनः कथां रसाधिक्या—त्कर्करायितशर्करां ॥ चेत्पिपाससि दीनार—सहस्रं देहि मे ततः ॥ ४० ॥ कथारंगच्छिदा दुःखं । लक्षेणापि न यास्यति ॥ इति सोऽदत्त दीनार—सहस्रमपि साहसी ॥ ४१ ॥ सोऽथ प्रोवाच विश्वासः । कार्यो नार्या न धीमता ॥ कथाद्वयं विधृत्येदं । धृतिच्छेदं न लप्स्यसे ॥ ४२ ॥ व्यमृशत् सोऽथ विप्रोऽय—महो लोभमहोदधिः ॥ यो मामेवं कथाव्या-

---

खेद करता एवा ते धर्मदत्तने ब्राह्मणे कह्युं के हे मित्र! तुं आ स्वल्प कथाथी खेद न कर? केमके आ स्वल्प कथा पण बन्ने लोकमां सुखकारी छे. ॥ ३९ ॥ वळी हजु पण रसना अधिकपणाथी उमदा साकरसरखा कथारसने जो तारे पीवानी इच्छा होय तो मने एक हजार सोनामहोरो आप? ॥ ४० ॥ कथारंगना भंगथी (थयेलुं) दुःख लाख (सोनामहोरोथी) पण जशे नहीं, एम विचारी ते साहसिके तेने एक हजार सोनामहोरो पण आपी. ॥ ४१ ॥ हवे ते ब्राह्मण बोल्यो के बुद्धिवाने स्त्रीनो विश्वास करवो नहि, अने आ बन्ने कथा हृदयमां धारवाथी तुं दुःखी थइश नहि. ॥ ४२ ॥ हवे ते धर्मदत्ते विचार्युं के अहो! आ ब्राह्मण तो लोभनो महा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जा—न्मुग्धान्ायमदंमयत ॥ ४३ ॥ लोगोऽयं ापितो वीत—रागैः क्वास्थामलप्स्यत ॥ नानविषय-
न्महास्थान—स्वरूपा यद्यमी द्विजाः ॥ ४४ ॥ यत्तृष्णा कमलौघेन । घनेनापि न शाम्यति ॥ वा-
डवा वाडवाग्नेस्तत्—सखायः प्रस्फुरच्छिखाः ॥ ४५ ॥ प्रायः प्रियजला विप्रा—स्तृष्णातापातुरा इव
॥ ाले सतिलकाः प्राप्त—साम्राज्या इव लोगिषु ॥ ४६ ॥ नास्ति त्रिष्वपि लोकेषु । लुब्धो म-

---

सागर छे, के जेणे मने भोळाने आवी रीते कथाना मिषथी दंड्यो छे. ॥ ४३ ॥ वळी आवा म-
हास्थानसरखा जो ब्राह्मणो ( दुनियामां ) न होत तो वीतरागोए डरावेलो लोग क्यां पोतानुं र-
हेठाण मेळवी शकत? ॥ ४४ ॥ ब्राह्मणोनी तृष्णा घणा धनना समूहथी ( वरसादथी ) पण शां-
त थती नथी, माटे खरेखर ते ब्राह्मणो शिखावाळा ( चोटलीवाळा ) वडवानलना मित्रसरखा छे.
॥ ४५ ॥ वळी ब्राह्मणो तृष्णारूपी तापथी जाणे व्याकुल थया होय नहि तेम तेउने हमेशां ज-
ल वहालुं छे, अने लोगी माणसोमां जाणे राजा होय नहि तेम तेउ कपालोमां ( राज्याभिषे-
कना चिन्हरूप ) तिलकने धारण करे छे. ॥ ४६ ॥ त्रणे लोकोमां मारासरखो बीजो कोइ लो-
भी नथी, एवुं देखाडवानेज आ ब्राह्मणो हमेशां जनोइना मिषथी हृदयमां त्रण रेखाउं धारण

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्सद्दशोऽपरः ॥ इति रेखात्रयं सूत्र—व्याजाद् बिभ्रत्यमी हृदा ॥ ४७ ॥ उदंगुलिः कृतोऽमीभि—
र्येद्वेदाध्ययने करः ॥ ततोऽभ्यासात्तथैवासौ । भवति प्रतिदायकं ॥ ४८ ॥ ब्राह्मणानां तनुरियं । न-
नु तृष्णातरंगिणी ॥ नो चेत्कटीतटीदेशे—ऽदभ्रदर्भोदयः कथं ॥ ४९ ॥ यल्लोभादमुनात्तं त—द्याच-
मानास्त्रपामहे ॥ देयं चेत्प्राग्भवस्यात्र—च्चुटिताः स्मस्तदा वयं ॥ ५० ॥ एवं वितर्कयंस्तेन । सह
वर्त्म विलंघ्य सः ॥ पारं पोत इवांभोधे—र्जगाम श्रीपुरं पुरं ॥ ५१ ॥ तस्माद् बहिः पटकुटी—र-

---

करे छे. ॥ ४७ ॥ वळी आ ब्राह्मणो वेद भणती वखते उंची आंगळीओवाळो जे पोतानो हाथ करे छे, ते अभ्यासथीज ते दातारप्रते पोतानो हाथ प्रसारे छे. ॥ ४८ ॥ ब्राह्मणोनुं आ शरीर खरेखर तृष्णानी नदीरूप छे, जो एम न होत तो तेओना कटीप्रदेशपर प्रकटरीते दर्भनी उत्पत्ति क्यांथी होत? ॥ ४९ ॥ लोभने वश थइ आ ब्राह्मणे मारी पासेथी जे धन लीधुं छे, ते पाछुं मागतां मने लज्जा थाय छे. माटे जो तेनुं पूर्वभवनुं देवुं हशे तो ते आपीने हुं तो छुटी गयो छुं. ॥ ५० ॥ एम विचारतोथको ते धर्मदत्त ते ब्राह्मण सहित मार्ग उल्लंघीने वहाण जेम समुद्रने कांठे तेम श्रीपुरनगरप्रते गयो. ॥ ५१ ॥ त्यां तेणे नगरनी बहार दोरीओथी मजबूत करेला

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्जुस्खलितसंचरं ॥ सार्थं सोऽस्थापयद्युक्त्या । चमूमिव चमूपतिः ॥ ५२ ॥ पथकः कथकश्चाय । स विप्रः समुपेत्य तं ॥ आलपीन्मधुरालापै–र्गृहं गंतुमना निजं ॥ ५३ ॥ पुरेऽस्मिन्नेव वास्तव्यः । सोऽहं वररुचिश्चिरं ॥ बहिर्भ्रांत्वाथ यास्यामि । गृहं नीडमिवांडजः ॥ ५४ ॥ त्वं मे प्रियवयस्योऽसि । सौहृदं मा स्म विस्मरेः ॥ पतितः संकटे बुद्धि–घस्मरे मां स्मरेः पुनः ॥ ५५ ॥ गृहाण त्वं जवादेतान् । यवान् मैत्र्या लवानिव ॥ यथा तथामी कस्यापि । न प्रकाश्या रहस्यवत् ॥ ५६ ॥ अमी

---

तंबूत नाख्या, तथा सेनापति जेम सैन्यने तेम तेणे त्यां सगवडथी पोतानो सार्थ स्थाप्यो. ॥५२॥ हवे ते मार्गे मळेला अने कथा कहेनार तथा पोताने घेर जवाना मनवाळा ते ब्राह्मणे तेनीपासे आवीने कह्युं के ॥ ५३ ॥ हुं आ वररुचि नामनो ब्राह्मण घणा काळथी आज नगरमां रहुं छुं, तथा देशाटन करीने पक्षी जेम पोताना माळाप्रते तेम हवे मारे घेर जइश. ॥ ५४ ॥ तुं मारो प्रिय मित्र छे, माटे तारे मित्राइ विसरवी नही, तेमज बुद्धिगम्य संकट पडती वखते वळी मने तुं याद करजे. ॥ ५५ ॥ वळी तुं आपणी मित्राइना लेशसरखा आ यवोने ग्रहण कर? वळी गुप्त वातनीपेठे तारे कोइने पण सहेज वातमां आ जव संबंधि विवेचन करवुं नहि. ॥ ५६ ॥ मंत्रथी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूमा जलैः सिक्ता । मित्र मंत्रपविविता: ॥ अत्युग्रपुण्यवत्सद्यः । प्ररोहंति फलंति च ॥ ५७ ॥ सोऽ-
थादाय यवांस्तस्मा—न्निजपत्न्याः समार्पयत् ॥ ययौ विप्रोऽपि धाम स्वं । प्रियापत्यदिदृक्षया ॥५८॥
समादाय समं श्रेष्टि—सुतोऽपि प्राभृतं मुदा ॥ सदाचारस्ततः सिंह—द्वारमाप क्ष्मापतेः ॥ ५९ ॥ क-
श्चिदेव दिदृक्षुस्त्वा—मिभ्यः प्राभृतपाणिकः ॥ द्वारे विलंबितोऽस्तीति । वेत्री नृपं व्यजिज्ञपत् ॥
॥ ६० ॥ द्राक्तं समानयात्रेति । नृपादिष्टेन वेत्रिणा ॥ अलिः परिमलेनेव । पुष्पं निन्ये स पर्षदं ॥

---

पवित्र थयेला आ यवो वावीने जलथी सिंचवाथी अतिशय पुण्यनीपेठे तुरत उगीने फळे तेवा
छे. ॥ ५७ ॥ हवे ते यवो तेनीपासेथी लेइने तेणे पोतानी स्त्रीने आप्या, तथा ते ब्राह्मण पण
पोतानी स्त्री तथा संतानोने मलवानी इच्छाथी पोताने घेर गयो. ॥ ५८ ॥ पछी ते सदाचारवाळो
श्रेष्टिपुत्र धर्मदत्त पण नेटणुं लेइने हर्षथी राजाना दरबारमां गयो. ॥ ५९ ॥ त्यारे छडीदारे जइने राजाने विनंति करी के, हे स्वामी! कोइक शाहुकार हाथमां नेटणुं लेइने आपने मळवानी इच्छाथी बारणे आवेलो छे. ॥ ६० ॥ तेने जलदी अहीं लाव? एवी रीते राजाए हुकम करवाथी परिमल जेम भमराने पुष्पप्रते लेइ जाय छे तेम ते छडीदार तेने सभामां लेइ गयो. ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

॥ ६१ ॥ उपदामुपपादांते । मुक्त्वा नृपं ननाम सः ॥ पीठे तद्दापिते हंस । इवाब्जे निषसाद च
॥ ६२ ॥ राज्ञश्च तस्य चालापाः । प्रावर्त्तंत परस्परं ॥ पूरयंतः सिताक्षोद —स्यूतचूतरसस्पृहां ॥६३॥
भक्त्या च स्नेहलोक्त्या च । तोषितस्तस्य नृपतिः ॥ मुमोच सकलं शुल्कं । गुणाढ्यः क्व न पूज्यते
॥ ६४ ॥ इह स्थितस्त्वमागच्छे—रनिशं मम संसदि ॥ इत्यादेशं नरेशस्य । स वितेने शिखामणिं
॥ ६५ ॥ त्रिभूमं नगरस्यांत—स्तस्यावस्थितये नृपः ॥ अदत्त सौधं तुष्टा हि । नृपाः कल्पद्रुमाः

॥ ६१ ॥ चरणमां भेटणुं मूकीने ते राजाने नम्यो, तथा हंस जेम कमलपर तेम राजाए अपावे-
लां आसनपर ते बेठो. ॥ ६२ ॥ पछी परस्पर साकरना चूरासाथे मळेला आंबाना रसनी इच्छाने
पूरतो एवो वचनविनोद तेनी अने राजानी वच्चे थयो. ॥ ६३ ॥ तेनी भक्तिथी तथा स्नेहयुक्त
वचनोथी खुशी थयेला राजाए तेनुं सघळुं दाण माफ कर्युं, केमके गुणवान माणस क्यां पूजातो
नथी? ॥ ६४ ॥ अहीं ज्यांसुधि रहो त्यांसुधि हमेशां तमारे मारी सभामां आववुं, एवी रीतना
राजाना हुकमने तेणे पण मस्तके चडाव्यो. ॥ ६५ ॥ पछी राजाए तेने रहेवामाटे नगरनी अंद-
र त्रण मजलानो महेल सोंप्यो, केमके खुशी थयेला राजाओ कल्पवृक्षसमान थइ पडे छे. ॥६६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

:इव ॥ ६६ ॥ तस्थुषस्तत्र तस्याथ । क्रयविक्रयकारिणः ॥ विटेन गंगदत्तेन । सौहृदमप्यजायत ॥
॥ ६७ ॥ बब्बूलेनेव रंभाया । राहुणेव सितद्युतेः ॥ बिमालेनेव हंसस्य । हुताशेनेव शाखिनः ॥
॥ ६८ ॥ एतेन क्रूरचित्तेन । संगतिस्तव नोचिता ॥ इत्युक्तोऽपि जनैरब्धि-र्विषवत्तं न सोऽत्यजत्
॥ ६९ ॥ विनापि धर्मदत्तं सो—ऽवतंसः सर्वमायिनां ॥ समं सुरूपया चक्रे । हास्यकेलिकुतूहलं
॥ ७० ॥ तज्जानन्नपि नाक्रुध्य-दिभ्यसूः सरलाशयः ॥ भ्रातो भ्रात इवाशेषः । साधुः साध्वेव प-

हवे त्यां रहीने लेवडदेवड करता एवा ते धर्मदत्तने गंगदत्त नामना एक लफंगा माणससाथे मि-
त्राइ थइ. ॥ ६७ ॥ बावळसाथे जेम केळनी, राहुसाथे जेम चंद्रनी, बिलाडासाथे जेम हंसनी त-
था अग्निसाथे जेम वृक्षनी ॥ ६८ ॥ तेम क्रूर मनवाळा एवा आ गंगदत्तनी साथे सोबत करवी
तने उचित नथी, एवी रीते लोकोए कह्या छतां पण समुद्र जेम विषने तेम तेणे तेने तज्यो
नहि. ॥ ६९ ॥ (अनुक्रमे) धर्मदत्तनी गेरहाजरीमां पण ते कपटीनो शिरोमणि गंगदत्त सुरू-
पासाथे हास्य क्रीडा विनोद आदिक करवा लाग्यो. ॥ ७० ॥ ते बाबतने जाणतां छतां पण ते
सरल आशयवाळो श्रेष्टिपुत्र धर्मदत्त क्षोभ पाम्यो नहि, केमके धरायेलो सर्वने धरायेला तथा स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्यति ॥ ७१ ॥ क्रमादवाप्तप्रसरः । स तस्यां विप्लुतोऽभवत् ॥ विकारकारणं कुक्षि-निक्षिप्तोऽपि ख-
लः खलु ॥ ७२ ॥ जनेभ्यस्तदपि श्रुत्वा । ऋजुरध्यायदिभ्यसूः ॥ भुंजानः स्वगृहे हंत । परतप्तिक-
रो जनः ॥ ७३ ॥ लोकोऽयं परविघ्नेच्छुः । सोढा न स्नेहमावयोः ॥ ब्रूतेऽस्मिन्नपि यद्दोषान् । दुग्धे
किं पूरकानिव ॥ ७४ ॥ एवं धीशाशयेऽप्यस्मिन् । विटः प्रकटमत्सरः ॥ रहः प्रोवाच तत्पत्नीं । दौः-
शील्येनात्मसात्कृतां ॥ ७५ ॥ मार्यते धर्मदत्तश्चे-द्वार्यते वा विशन् गृहं ॥ जाये जायेत तद्भोग—

ज्जन सर्वने सज्जनज जुए छे. ॥ ७१ ॥ अनुक्रमे अवसर मेळवीने ते तेणीनीसाथे भोगविलास पण करवा लाग्यो, केमके हृदयमां ( पेटमां ) स्थापेलो पण दुर्जन ( खोळ ) खरेखर विकार क-रनारो थाय छे. ॥ ७२ ॥ आ वृत्तांत पण लोकोना मुखथी सांभळ्या छतां ते भोळो धर्मदत्त एम विचारवा लाग्यो के लोको तो पोताने घेर खाइपीने परनीज खोदणी कर्या करे छे. ॥ ७३ ॥ लोको परविघ्नसंतोषी होवाथी अमारा बन्ने वच्चेनो स्नेह सहन करी शकता नथी, केमके दूधमां पू-रानीपेठे तेओ आ गंगदत्तमां पण दोषो कहे छे. ॥ ७४ ॥ एवी रीते शुभ आशयवाळा एवा पण आ धर्मदत्तप्रते प्रकटरीते द्वेष करनारो ते गंगदत्त एक दिवसे पोताना दुःशीलपणाथी वश करे-

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

रंगो निर्भयमावयोः ॥ १६ ॥ एवमेवैतदित्यस्य । वचः साप्यन्ववर्त्तत ॥ क्रौर्यनिर्जितशस्त्रीणां । धिक् स्त्रीणां चपलं मनः ॥ १७ ॥ ततः स विततद्रोह—प्ररोहः श्रेष्ठिनः सदा ॥ सुतप्ततपसः कोप । इवाभूत् पारिपार्श्वकः ॥ १८ ॥ अन्यदा सह मित्रेण । सदःस्थं तं नृपोऽभ्यधात् ॥ किं कचिच्चि त्रमालोकि । भवता भ्राम्यता भुवं ॥ १९ ॥ सोऽप्यूचे देव दंभेन । दृग्बंधात्करलाघवात ॥ दृश्यंते

---

ली एवी तेनी स्त्रीने गुप्त रीते कहेवा लाग्यो के, ॥ १५ ॥ हे प्रिये! जो धर्मदत्तने मारी नाखवामां आवे अथवा अहीं घेर आवतो अटकाववामां आवे तो पछी आपण बन्नेनो भोगरंग निर्भयपणे थाय. ॥ १६ ॥ एमज करवुं ठीक छे, एम कही तेणीए पण तेनुं वचन स्वीकार्युं. क्रूरपणाथी जीतेल छे शस्त्रो जेणीए एवी स्त्रीओना चंचल मनने धिक्कार छे. ॥ १७ ॥ पछी जेम क्रोध तपस्वीनो सोबती थाय छे, तेम ते गंगदत्त ( मनमां ) द्वेषनो अंकुरो लावीने शेठनो सोबती थयो ॥ १८ ॥ एक दिवसे ते मित्रसहित सभामां बेठेला ते धर्मदत्तने राजाए कह्युं के हे धर्मदत्त तें पृथ्वीपर देशाटन करतांथकां कोइ पण जगोए शुं कंइ आश्चर्य जोयुं छे? ॥ १९ ॥ त्यारे तेणे पण कह्युं के हे स्वामी! कपटथी नजरबंधीथी अथवा हाथचालाकीथी जे कंइ आश्चर्यो देखाय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यानि चित्रैस्तै—र्न चित्रीयामहे वयं ॥ ८० ॥ गृहे मम यवाः संति । चित्रियावल्लिपल्लवाः ॥ सद्य-
स्त्वत्पदांहिसेवेव । स्थाने न्यस्ता फलंति ते ॥ ८१ ॥ तत् श्रुत्वा विस्मिते राज्ञि । दिदृक्षारजसाज्जने
॥ धुनान्मौलिं गंगदत्त—स्तत्कथाज्ञः पुनः पुनः ॥ ८२ ॥ किं वाताहतशाखीव । शिरो धूनयसी-
ति सः ॥ पृष्टो राज्ञा जगौ प्रीतः । प्राप्य प्रेत इव छलं ॥ ८३ ॥ असमंजसवादित्व—ममुष्य तव
चार्जवं ॥ आश्चर्यकारणं वीक्ष्य । शिरः कस्य न कंपते ॥ ८४ ॥ धनस्य संनिपातस्ये—वोष्मणा

---

छे, तेथी अमोने कंइ आश्चर्य थतुं नथी. ॥ ८० ॥ परंतु मारे घेर चित्रावेलीना पल्लवसरखा जव
छे, के जे जवो एक जगोए वाव्याथी आपना चरणनी सेवानीपेठे तुरत फले छे. ॥ ८१ ॥ ते
सांभळीने ते यवोने जोवानी इच्छाना वेगथी राजा तथा सभालोक आश्चर्य पामते छते ते यव
ना वृत्तांतने जाणनारो गंगदत्त वारंवार मस्तक धुणाववा लाग्यो. ॥ ८२ ॥ वायुथी कंपेला वृक्ष-
नीपेठे तुं मस्तक केम धुणावे छे, एवी रीते राजाए पूछवाथी ते दुष्ट प्रेतनी पेठे लाग जोइने
खुशी थइ बोल्यो के, ॥ ८३ ॥ आ धर्मदत्तनुं जूठुं बोलवापणुं तथा आपनी सरलता, ए बन्ने आ-
श्चर्यकारक जोइने कोनुं मस्तक कंपे नही!! ॥ ८४ ॥ हे स्वामी! संनिपातसरखा धनना तापथी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रलपंति ये ॥ तद्वाचि तात्विकी बुद्धिः । स्वामिन्ननुचिता तव ॥ ८५ ॥ धूर्त्तोक्तिषु दधानस्य । धृतिं धीवंध्यचेतसः ॥ तव पालयतो राज्यं । मनोऽपि मम कंपते ॥ ८६ ॥ गृह्णातु मम सर्वस्वं । स चेद्यदेष सत्यवाक् ॥ नो चेत्करद्वयग्राह्यं । वस्तु देयमनेन मे ॥ ८७ ॥ तन्मेने धर्मदत्तोऽपि । सत्योऽहमिति निश्चयात् ॥ बभूव नृपतिः साक्षी । पणबंधे तयोस्तदा ॥ ८८ ॥ सत्याऽसत्यपरीक्षेयं । प्रातः सर्वापि ज्ञास्यते ॥ वदन्निति नृपास्थाना—द्धर्मदत्तो विनिर्ययौ ॥ ८९ ॥ ममैव धाम्नि सं-

---

( प्रेरायेला ) जे मनुष्यो बबडे छे, तेना वचनमां आपे तत्वबुद्धि राखवी ए उचित नथी. ॥८५॥ धूर्तोना वचनोमां विश्वास राखनारा तथा बुद्धिरहित चित्तवाळा एवा आप जे आ राज्य निभावी शको छो! तेथी तो मारुं मन पण थरथरे छे! ॥ ८६ ॥ वळी जो आ धर्मदत्त सत्य बोलनारो ठरे तो मारी सर्व मिल्कत ते लेइ ले, अने जो तेम साबीत न थाय तो तेना घरमांथी मारा बे हाथोवडे जे वस्तु हुं लेउं ते तेणे मने आपवी. ॥ ८७ ॥ हुं तो सत्य छुं एवा निश्चयथी धर्मदत्ते पण ते शरत स्वीकारी, तथा ते समये राजा तेउ बन्नेनी ते शरतमां साक्षी थयो. ॥ ८८ ॥ हवे आ सत्य असत्यनी परीक्षा सघळी सवारे जणाइ रहेशे, एम बोलतोथको धर्मदत्त राजसभा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्येते । यवास्तत्किं विषिद्यते ॥ इत्यनाकुल एवासौ । लग्नो वाणिज्यकर्मणि ॥ ८० ॥ विटस्तद्धाम गत्वोक्त्वा । सुरूपाया यथातथं ॥ यवांस्तान् प्रार्थयामास । स्वयं न्यासीकृतानिव ॥ ८१ ॥ यत्रानि-न्यतनूजस्य । जीवितादपि वल्लभान् ॥ प्रदाय तान् विश्रयान्यां—स्तेषां स्थाने न्यधत्त सा ॥ ८२॥ ऊचे च नाथ गृह्णीथा-स्तदा पाणिद्वयेन मां ॥ त्वत्राहं पाणिनैकेना—हृता द्वाभ्यां पुनर्नवान् ॥ ॥ ८३ ॥ मास्म गृद्धिं व्रजे रत्न-रुक्मरूप्यादिवस्तुषु ॥ लाने सचेतनाया मे । कामना का ह्यचेतने

मांथी गयो. ॥ ७९ ॥ मारा घरमांज ते जवो छे, माटे मारे चिंता शुं करवी? एम विचारी ते तो कंइं पण आकुलताविना पोताना व्यापारमां जोमाइ गयो. ॥ ८० ॥ हवे ते लफंगो गंगदत्त धर्मदत्तने घेर जइने तथा बनेलो वृत्तांत सुरूपाने कहीने जाणे पोते आपणतरीके राख्या होय नहि तेम ते यवोने मागवा लाग्यो. ॥ ८१ ॥ ते श्रेष्टिपुत्रना जीवितथी पण अतिवल्लभ एवा ते यवो ते लफंगाने देइने तेणीए तेउनी जगोए बीजा स्थाप्या. ॥ ८२ ॥ वळी तेणीए तेने कह्युं के, हे स्वामी! ते समये बन्ने हाथोथी मनेज लेजे, त्तारे तो मने एक हाथे लीधी छे, परंतु तारे मने बे हाथे लेवी. ॥ ८३ ॥ वळी ते वखते रत्न सुवर्ण तथा रूपाआदिक वस्तुमां लालच

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

॥ ७४ ॥ तस्या धैर्यापहर्त्रीभि—रिति स्नेहोक्तिजालिभिः ॥ विद्धोऽपि जीवितंमन्यः । स ततो नि-
रगाद् द्रुतं ॥ ७५ ॥ समये धर्मदत्तोऽपि । समायतः स्वमंदिरं ॥ सुहृद्वादं जगौ पत्न्या । ऋजुर्गुह्यं
रिपोरिव ॥ ७६ ॥ शाठ्यभूः साप्यवग् नेतः । किमेतद्विहितं त्वया ॥ चेन्मामेवैष हस्ताभ्यां । द
ध्यात्तत्को निषेधकः ॥ ७७ ॥ अथ सोपपतिध्याना—दन्यचित्ता विपर्ययात ॥ निर्मिमाणाखिलं ह-

---

नहि करजे, केमके मारो सचेतननो ज्यारे तने लाभ थाय छे, त्यारे सुवर्णादिक अचेतननी इ
च्छा करवी शा कामनी छे? ॥ ७४ ॥ एवीरीतनां धैर्यने हरनारां तेणीनां स्नेहवचनरूपी जालांज-
थी विंधायेलो एवो पण ते गंगदत्त पोताने जीवतो मानतोथको त्यांथी तुरत निकळी गयो. ॥
॥ ७५ ॥ हवे अवसरे धर्मदत्त पण घेर आवीने सरल माणस जेम पोतानी गुप्त वात शत्रुने क-
हे तेम मित्रसाथे थयेलो विवाद स्त्रीने कह्यो. ॥ ७६ ॥ त्यारे लुचाइना स्थानसरखी ते सुरूपा
पण बोली के हे स्वामी! आ तमोए शुं कर्युं? ते वखते कदाच जो ते मनेज पोताना बे हा-
थोथी लेशे तो तेने कोण अटकावशे? ॥ ७७ ॥ हवे ते पोताना यारनाज ध्यानथी व्याकुळ थ-
येली होवाथी घरनुं सर्व कामकाज ज्यारे उलटुं करवा लागी त्यारे धर्मदत्ते तेणीने कह्युं के, ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

र्य—कर्म जात्रीं न्यगद्यत ॥ ९८ ॥ जानानोऽस्मि बिनेषि त्व—मस्माद्भागी वृकादिव ॥ मा भीरु नै-
रिदं मित्रं । मयि द्रुह्यति जातु न ॥ ९९ ॥ इति तेनोदिता तोषं । कृत्रिमं सा विवृण्वती ॥ कू-
रेण निन्येऽहोरात्र—मंतर्विटवियोगिनी ॥ ३०० ॥ प्रातरादाय तद्दत्तान् । यवान् विश्वासवंचितः
॥ धर्मदत्तो ययौ राज—समाजं सुहृदा सह ॥ १ ॥ तत्र स प्रेरितो राज्ञा । कौतुकोपेतचेतसा ॥
पार्षद्यैः प्रेक्षितः प्रीति—पूरस्फारितलोचनैः ॥ २ ॥ कटाक्षितः कुटिलया । दृशा पल्लविकेन च ॥

---

॥ ९८ ॥ हे प्रिये! हुं एम धारुं छुं के तुं वरुथी जेम बकरी तेम ते गंगदत्तथी डरे छे, परंतु तुं डर नही, केमके ते मारो मित्र मारापर कदापि पण द्वेष करे तेवो नथी. ॥ ९९ ॥ तेणे एम कहेवाथी उपरउपरनी खुशी देखाडतीथकी परंतु मनमां ते लफंगाना वियोगनेज चिंतवती एवी तेणीए केटलीक मुश्केलीए ते रात्रिदिवस पसार कर्यो. ॥ ३०० ॥ हवे प्रभाते विश्वासथी ठगायेलो ते धर्मदत्त तेणीए आपेला यवो लेइने गंगदत्तसहित राजसभामां गयो. ॥ १ ॥ त्यां कौतुकी मनवाळा राजाए प्रेरेलो तथा प्रीतिना समूहथी विकस्वर लोचनोथी सभासदोवडे करीने जोवाएलो ॥ २ ॥ तथा ते लफंगा गंगदत्तवडे करीने करडी नजरथी जोवाएलो ते धर्मदत्त मा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यवानुवाप नूपीठे । मृदा प्रच्छादिते ततः ॥ ३ ॥ युग्मम् ॥ इत्वरीकरदावाग्नि—दग्धा इव न ते यवाः ॥ प्ररोहंतिस्म संसिक्ता । अपि नीरैर्निरंतरं ॥ ४ ॥ सेचं सेचं स निर्विण्णो । घोषं घोषं गुरुर्यथा ॥ नांकूरोऽपि यवेष्वासीद् । बोधिलाभो जडेष्विव ॥ ५ ॥ फलं दूरेऽस्तु नांकूर—मात्रमप्येषु वीक्ष्यते ॥ पुरः क्षितिपतेरेवं । त्राट्कृत्य न्यगदद्विटः ॥ ६ ॥ अहो अद्भुतकारित्व–महो सत्यप्रतिज्ञता ॥ अहो कलासु कौशल्य—महो अस्य विवेकिता ॥ ७ ॥ यन्मे देयमनादेय–वचसा श्रेष्ठि-

---

टीथी छावेला पृथ्वीतलपर यवोने वाववा लाग्यो. ॥ ३ ॥ कुलटाना हाथरूपी दावानलथी जाणे बळी गयेला होय नहि तेम ते यवो जलथी निरंतर सिंच्या छतां पण उग्या नहि. ॥ ४ ॥ गुरु जेम कही कहीने थाके तेम ते सींची सींचीने थाक्यो, परंतु जडनेविषे जेम बोधिलाभ तेम ते यवोमां अंकुरो पण फुट्यो नहि. ॥ ५ ॥ त्यारे ते लुच्चो गंगदत्त एकदम तडाको करीने राजाप्रते बोल्यो के फल तो दूर रह्युं, परंतु मात्र अंकुरो पण आमां देखातो नथी. ॥ ६ ॥ अहो आनुं आश्चर्यकारीपणुं! अहो आनुं सत्यप्रतिज्ञापणुं! अहो कलानी बहादुरी! तथा अहो आनुं विवेकीपणुं! ॥ ७ ॥ माटे हे राजन्! हवे आ जूठाबोला शेठपासेथी मने जे अपाववानुं छे ते आप

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नामुना ॥ तद्दापय प्रजापाल । साद्दयसि त्वं यदावयोः ॥ ८ ॥ राज्ञोचे सौम्य संजात—मद्य माध्यंदिनं दिनं ॥ प्रातर्निर्वाह्य वादं ते । दास्ये चास्येऽशनं त्वनु ॥ ९ ॥ स्वयमेव कदाप्येष । तावत्त्वद्देयमर्पयेत् ॥ तदौषधं विना व्याधि—विध्वंसः समजायत ॥ १० ॥ प्रमाणयन् नृपादेशं । गंगदत्तो विनिर्ययौ ॥ अनन्यमतिरन्यस्तु । गृहं वररुचेर्ययौ ॥ ११ ॥ तेनात्याकुलताहेतुं । पृष्टः श्रेष्ठी यथातथं ॥ यवोदंतं जगौ स्थूलं । स्थूलाश्रुपटलं किरन् ॥ १२ ॥ ऊचे वररुचिर्वत्स । न वत्सरश-

---

अपावो? केमके आप अमारा बन्नेना साक्षी छो. ॥ ८ ॥ त्यारे राजाए गंगदत्तने कह्युं के, जला माणस! आज तो बपोर थइ गया छे, माटे प्रजाते तारा वादनो निश्चय करीने तने अपावीश, अने त्यारबाद हुं जोजन करीश. ॥ ९ ॥ वळी एटलामां ते पोतेज तने आपवानुं जो आपी दे तो औषधविनाज रोगनो नाश थइ जशे. ॥ १० ॥ एवी रीतना राजाना हुकमने स्वीकारीने गंगदत्त त्यांथी निकळ्यो, अने धर्मदत्त तो बीजो उपाय न सूजवाथी वररुचिब्राह्मणने घेर गयो. ॥ ॥ ११ ॥ त्यारे वररुचिए अति गभराटनुं कारण पूछवाथी तेणे बोरबोरजेवमां आंसु पाडतांथकां यवोनो वृत्तांत कह्यो. ॥१२॥ त्यारे वररुचिए कह्युं के हे वत्स! सर्वज्ञना वचनोनीपेठे सेंकडो वर्षे

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तैरपि ॥ सर्वज्ञस्य वचांसीव । विघटंते यवा मम ॥ १३ ॥ मन्ये यवविपर्यासो । विहितस्तव भार्यया ॥ सा विटे गंगदत्तेऽस्मिन् । नूनमस्त्यनुरागिणी ॥ १४ ॥ किं न स्मरसि यो यत्त्वं । पाठितोऽभूस्तदा मया ॥ विश्वासं योषितो नीचैः । संसर्गं मा कृथा इति ॥ १५ ॥ सतामग्राह्यनामासौ । गंगदत्तः सुहृत्तव ॥ कुर्वती कृत्रिमं प्रेम । प्रियापि स्वैरिणी तव ॥ १६ ॥ यदि विस्मृतवान् वत्स । मच्छिक्षामंत्रमुत्तमं ॥ पिशाचाभ्यामिवैताभ्यां । संप्रति छलितोऽसि तत् ॥ १७ ॥ धर्मदत्तोऽभ्यधात्पत्नी ।

---

पण मारा यवो जूठा पडे तेम नथी. ॥ १३ ॥ हुं धारुं छुं के तारी स्त्रीए यवोने बदलावी नाख्या छे, अने खरेखर ते तारी स्त्री ते लफंगा गंगदत्तप्रते रागवाळी थइ छे. ॥ १४ ॥ अरे! तने शुं याद नथी? में ते वखतेज तने शिखाव्युं हतुं के स्त्रीनो विश्वास तथा नीचनो संग करवो नहि. ॥ १५ ॥ जेनुं नाम पण सज्जनोने लेवालायक नथी, एवो ते तारो मित्र गंगदत्त छे, तथा उपरथी जूठो प्रेम बतावनारी तारी स्त्री पण कुलटा छे. ॥ १६ ॥ वळी हे वत्स! मारी शिखामणरूपी उत्तम मंत्रने जो तुं विसरी गयो, तो हमणा पिशाचसरखा आ बन्नेए तने छल्यो छे. ॥ १७ ॥ (ते सांभळी) धर्मदत्ते कह्युं के अरे! मारी स्त्री तो गंगाजलसरखी पवित्र छे! ए बिचारो शील-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मम गंगाजलोज्ज्वला ॥ न तस्याः शीलशालिन्या । अन्यायं वक्तुमर्हसि ॥ १८ ॥ द्विजः स्माह
ऋजोऽद्यापि । स्त्रीचरित्रं न बुध्यसे ॥ मया सर्वं प्रियावृत्तं । तव प्रकटयिष्यते ॥ १९ ॥ नृपे प्रात-
र्गृहायाते । पत्नीमारोप्य कुट्टिमे ॥ निःश्रेणीं दूरतो मुंचे-रिति विप्रः शशास तं ॥ २० ॥ इमं त-
स्योपदेशं स । हसयन्निजमानसे ॥ निर्व्याजमानशे तोषं । तीर्णार्णव इव क्षणं ॥ २१ ॥ गंगद-
त्तो द्वितीयेऽह्नि । नरनाथं व्यजिज्ञपत ॥ त्वयि साक्षिणि नो लभ्यं । लग्नं कोऽयं नयः प्रभो ॥

वंती महासतीनुं दूषण बोलवुं ए तमोने युक्त नथी. ॥ १८ ॥ वररुचिए कह्युं के अरे मूर्ख! तुं ह-
जु स्त्रीचरित्र जाणतो नथी, हुं तारी स्त्रीनुं सघळुं चरित्र तने देखाडी आपीश. ॥ १९ ॥ हवे प्र-
भाते राजा ज्यारे घेर आवे त्यारे तारी स्त्रीने माळपर चडावीने तारे निसरणी दूर मूकवी, एवी
रीते ब्राह्मणे तेने शिखामण आपी. ॥ २० ॥ तेना आ उपदेशने सारविनानो जाणी मनमां ह-
सतोथको धर्मदत्त क्षणवार जाणे समुद्र तरी गयो होय नहि तेम संतोष मानवा लाग्यो. ॥२१॥
बीजे दिवसे गंगदत्त राजाने विनंति करी के हे स्वामी! आप साक्षी छतां हजु मारुं लेणुं मने म-
ळतुं नथी ए न्याय केवो! ॥ २२ ॥ वळी आ मारा वहाला मित्रपासे मागवुं ए जो के शरम भ-

॥ २२ ॥ प्रार्थना प्रियमित्रेऽत्र । कारणं यद्यपि ह्रियः ॥ लभ्यवस्तुपरित्याग–स्तथापि खलु दुःसहः ॥ २३ ॥ धर्मदत्ते रुषं धत्ते । यावत्तद्वचसा नृपः ॥ तावदागत्य तेनैव । विज्ञप्तो विनयांचितं ॥२४॥ देव मे सेवकस्यौकः । स्वकपादैः पवित्रय ॥ यथार्हदापनादस्या—धमर्णान्मां च मोचय ॥ २५ ॥ मुक्तकोपस्ततो नृपः । पौरव्रातवृतोऽचलत् ॥ गृहेऽस्य किं गृहीतासौ । कराऩ्यामिति कौतुकी ॥२६॥ पौरेभ्यः पुरतो भूत्वा । त्वरितत्वरितैः पदैः ॥ गत्वा निजगृहं धर्म–दत्तः पत्नीमवोचत ॥ २७॥ लु॰

---

रेलुं छे, तो पण लेणी वस्तु तजवी ए खरेखर मुश्केल छे. ॥ २३ ॥ एवी रीतना तेना वचनथी राजा जेवामां धर्मदत्तपर गुस्से थाय छे, तेवामां धर्मदत्तेज त्यां आवी विनयपूर्वक राजाने विनंति करी के ॥ २४ ॥ हे स्वामी! मारुं सेवकनुं घर आपना चरणोवडे पवित्र करो? अने गंगदत्तने तेनी इछामुजब अपावीने मने तेना करजथी छोमावो. ॥ २५ ॥ ( ते सांभळी ) क्रोध तजीने राजा आने घेर बेहाथे आ गंगदत्त जोइए शुं ले छे? एवी रीतनां कौतुकवाळो थइने नगरना लोकोना समूहथी युक्त थयोथको चालवा लाग्यो. ॥ २६ ॥ ते वखते धर्मदत्त उतावळे पगे नगरना लोकोथी आगळ नीकळी पोताने घेर जइ सुरूपाने कहेवा लाग्यो के, ॥ २७ ॥ हे प्रिये!

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्तिष्ठ दयिते मुंच । प्रपंचमखिलं पुरः ॥ निवेशयासनश्रेणि—मयमायाति नृपतिः ॥ २८॥ मत्का-
मना मनागद्य । फलितेव निरीक्ष्यते ॥ इति सा द्विगुणोत्साहा । तेने सर्वं तथैव तत् ॥ २९ ॥
मालोपरि स्थितं सिंहा—सनमानय नूत्नुजे ॥ इति भर्त्रा समादिष्टा । साध्यारोहदधिश्यकां ॥ ३० ॥
नीताऽनयाऽनयाप्येषा । प्रोच्चैरिति रुषेव सः ॥ निःश्रेणीं दूरतोऽमुंचत् । सापराधां प्रियामिव ॥३१॥
वरत्रां कूपके क्षिप्त्वा । कथं हा कांत कृंतसि ॥ इत्यारटंतीं तामेड—श्वोपेक्षां चकार सः ॥ ३२ ॥

तुं जलदी उठी था? बीजुं बधुं कार्य छोडी दे? राजाजी आवे छे माटे आसनोनी श्रेणि मांड?
॥ २८ ॥ आजे मारी इछा कंइक फळेली देखाय छे, एम विचारी बेवडा उत्साहथी सुरूपाए स-
घळुं तेज मुजब कर्युं. ॥ २९ ॥ हवे तुं मजलापर रहेलुं सिंहासन राजामाटे लाव? एवी रीते भ-
र्तारे हुकम कर्याथी सुरूपा नीसरणीपर चडीने मजलापर गइ. ॥ ३० ॥ आ दुराचारी स्त्रीने पण
आ नीसरणी उपर लेइ गइ, तेथी उत्पन्न थयेला अति रोषथीज जाणे होय नहि तेम ते धर्म-
दत्ते अपराधी स्त्रीनीपेठे ते नीसरणीने ( त्यांथी खेसवीने ) दूर मूकी. ॥ ३१ ॥ हे स्वामी! मने
कुवामां उतारीने हवे तुं दोरी शामाटे कापे छे? एवी रीते पोकार करती एवी ते सुरूपानी जा-

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

श्रेष्ठी तत्रागते राज्ञि । पौरपूरांतरागतं ॥ स्वं मूर्त्तमिव सत्कर्मा—ऽद्राक्षीद्वररुचिं द्विजं ॥ ३३ ॥ ततः प्रविततस्फूर्त्ति—रसौ तारस्वरं जगौ ॥ गंगदत्त गृहाण त्वं । वस्तु यद्रोचते तव ॥ ३४ ॥ सोऽपि चंचलदृक्पश्यं—स्तस्य गेहमितस्ततः ॥ तां चित्तचौरिकां कामा—कुलो नालोकत क्वचित ॥ ३५॥ तस्यात्याकुलचित्तस्य । स्वं ज्ञापयितुमातनोत् ॥ मालोपरि गता कासं । भृशं भुक्तगुडेव सा ॥३६॥ तां मत्वा चंद्रशालास्था—मवतारयितुं विटः ॥ पाणिद्वयेन जग्राह । निःश्रेणीं निरपत्रपः ॥ ३७ ॥

---

णे पोते बहेरो होय नहि तेम धर्मदत्ते कंइ दरकार करी नहि. ॥ ३२ ॥ हवे राजा ज्यारे त्यां आव्यो त्यारे नगरना लोकोना समूहनी अंदर पोताना मूर्त्तिवंत शुभ कर्मसरखा ते वररुचि ब्राह्मणने पण आवेलो शेठे जोयो. ॥ ३३ ॥ अने तेथी हिम्मत लावीने तेणे मोटे स्वरे कह्युं के, हे गंगदत्त! जे वस्तु तने गमे ते तुं लेइ ले? ॥ ३४ ॥ त्यारे चपल दृष्टिवाळो ते कामातुर गंगदत्त आम तेम तेनुं घर जोवा लाग्यो, परंतु पोताना चित्तने चोरनारी ते सुरूपाने तेणे क्यांय पण जोइ नहि. ॥ ३५ ॥ एवी रीते व्याकुल चित्तवाळा ते गंगदत्तने पोतानुं स्थान जणाववामाटे मजलापर रहेली सुरूपा जाणे, खूब गोळ खाइने बेठी होय नहि तेम खांसी करवा लागी. ॥३६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यावन्मुंचति निःश्रेणीं । स्वस्थाने तावदिभ्यभूः ॥ संकेतितो वररुचि—द्विजेनोचे स्फुटाक्षरं ॥३८॥
हंहो मा मुंच निःश्रेणीं । पाणिभ्यां स्वयमादृतां ॥ नृपः साक्ष्यस्ति शृण्वंतु । सर्वे नगरवासिनः ॥
॥ ३९ ॥ इहैता हेममंजूषा । इमे रत्नसमुद्गकाः ॥ संति किंत्वस्य निःश्रेण्या—मेव दृष्टिररज्यत ॥
॥ ४० ॥ उपमर्दोचिता साधु—काष्टोच्चारोहकारणं ॥ सद्मश्रीकृत्करात्तेयं । किं त्याज्या सुवधूरिव ॥

---

त्यारे तेणीने मजलापर रहेली जाणीने त्यांथी उतारवामाटे ते निर्लज्ज लफंगाए पोताना बन्ने हाथे निसरणी पकडी. ॥ ३७ ॥ पछी जेवो ते निसरणीने तेनी योग्य जगोए मुके छे, तेवोज श्रेष्ठिपुत्र धर्मदत्त वररुचि ब्राह्मणे संकेत करवाथी प्रकट रीते बोल्यो के, ॥ ३८ ॥ अरे! तें पोतानी मेळेज बन्ने हाथे पकडेली निसरणीने हवे छोड नहि. केमके आ बाबतमां राजा साक्षी छे, तेम हे नगरलोको! तमो पण सांभळो ॥ ३९ ॥ आ अहीं सुवर्णनी पेटीओ, तथा आ रत्नोना डाबडाओ पण पडेला छे, परंतु आ ( मारा मित्रनी ) नजर तो आ निसरणीमांज खुशी थयेली छे. ॥ ४० ॥ वळी आ निसरणी उत्तम स्त्रीनीपेठे उपमर्दन करवालायक ( आलिंगन करवालायक ) उत्तम काष्टवाळी ( शरीरना मनोहर बांधावाळी ) तथा उपर चडवालायक घरनी शोभा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ४१ ॥ साधुसाध्विति जल्पाकै—र्ग्राम्यवन्नागरैरपि ॥ दत्ततालं ततोऽहासि । विटो हास्यास्पदं हि सः ॥ ४२ ॥ अस्य दुःशीलतामर्म । धर्मदत्तेन बोधितः ॥ नृपस्तं विषयव्याप्त—मपि निर्विषयं व्यधात् ॥ ४३ ॥ माभूदमंगलं छिन्न—नक्रासौ पुरवासिनां ॥ इति निर्वासिता मृत्वा । सुरूपा दुर्गतिं गता ॥ ४४ ॥ वनिताजनितामंद—दुःखांदोलितमानसं ॥ अथैवमन्वशात्कर्म—दत्तं वररुचिः सखा ॥ ४५ ॥ दीनाराणां शतैः पंच—दशभिः पाठितोऽभवः ॥ तथापि विप्रलुब्धोऽसि । वत्सान्यां धिक्

---

करनारी अने हाथे करीने फालेली हवे शुं तारे तजवी जोइये! ॥ ४१ ॥ व्याजबी छे व्याजबी छे, एम कहीने नगरना लोकोए पण गामडीआओनीपेठे ताळी देइने ते लफंगानी हांसी करी, केमके ते हांसीने लायकज हतो. ॥ ४२ ॥ पछी धर्मदत्ते तेना दुराचारनो मर्म राजाने जाहेर कर्यो, त्यारे राजाए ते विषयवाळा गंगदत्तने पण विषयरहित एटले देशपार कर्यो. ॥ ४३ ॥ पछी ते सुरूपानुं पण नाक काप्युं, अने हवे आ नकटी नगरना लोकोने अपशकुन करनारी थवी जोइये नहि एम विचारी (राजाए) त्यांथी कहाडी मूकेली ते सुरूपा मरीने दुर्गतिमां गइ. ॥ ॥ ४४ ॥ एवी रीते स्त्रीथी उत्पन्न थयेला अत्यंत दुःखथी अस्थिर मनवाळा ते धर्मदत्तने वररुचि

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तवार्जवं ॥ ४६ ॥ लभते निर्मलात्मापि । नीचसंगाद् गुणच्युतिं ॥ पश्य वारि नवेन्मेघ—पयः प-
तितमूषरे ॥ ४७ ॥ निष्कलः कुकलत्रेण । मिलितः स्यान्महानपि ॥ कलाहीनः कुहूयोगे । किं
न राजापि जायते ॥ ४८ ॥ विषवल्ली विनाशाय । प्रायः पार्श्वे निषेदुषां ॥ भवद्वयविनाशाय ।
ध्यातमात्रा अपि स्त्रियः ॥ ४९ ॥ अमुच्यमाना ज्वलिता—लानवत्तापहेतवः ॥ नार्योऽनार्योचिता

मित्रे शिखामण आपी के ॥ ४५ ॥ हे वत्स! पंदरसो सोनामहोरो लेइने में तने भणाव्यो हतो
तो पण तुं ते बन्नेथी ठगायो, माटे तारी मूर्खाइने धिक्कार छे! ॥ ४६ ॥ नीचना संगथी निर्मल
माणस पण पोताना गुणो गुमावी बेसे छे, तुं जो के उषरभूमीपर पडेलुं वरसादनुं पाणी पण
खारुं थइ जाय छे. ॥ ४७ ॥ खराब स्त्रीना संगथी महान् पुरुष पण कलारहित थाय छे, केमके
अमावास्याना संगथी चंद्र पण शुं कलारहित थतो नथी? ॥ ४८ ॥ फेरी वेलडी प्रायें करीने पा-
से बेठेला प्राणीओनो नाश करे छे. परंतु स्त्रीओ तो तेणीना फक्त ध्यानथीज बन्ने भवोमां विना-
श करनारी थाय छे. ॥ ४९ ॥ जो ते स्त्रीओने तजवामां न आवे तो तेओ बळेला थांभलानीपे-
ठे ताप करनारी थाय छे, माटे एवी नीचने ग्रहण करवालायक स्त्रीओ जेओए दूर तजी छे एवा ते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दूरे । विमुक्ता यैर्जयंतु ते ॥ ५० ॥ इति तद्वाक्यचंद्रांशु—स्फीतवैराग्यसागरः ॥ जवोद्विग्नो नवक्षेत्र्यां । सोऽव्ययीदखिलं धनं ॥ ५१ ॥ घनेन तपसा भेत्तु—कामः संसारपंजरं ॥ स्त्रीविरक्तः प्रवव्राज । स पार्श्वे सुमतेर्गुरोः ॥ ५२ ॥ एकादशांगपारीणो । विहरन् स महीतले ॥ पुरीं वाराणसीमेव । स्वामेव तपसा ययौ ॥ ५३ ॥ वंदनायातलोकाना—मुपदेशं दिशन्नसौ ॥ तत्रार्हद्धर्मसाम्राज्य—मेकछत्रमपप्रथत् ॥ ५४ ॥ चिरं पुत्रवियोगार्त्तो । दुःखविस्मृतये क्षणं ॥ दयितासहितः श्रेष्ठी । तं

---

( मुनिओ ) जयवंता वर्तो ? ॥ ५० ॥ एवी रीतनां वररुचिनां वचनोरूपी चंद्रना किरणोथी धर्मदत्तनो वैराग्यरूपी समुद्र उल्लसायमान थयो, अने तेथी संसारथी कंटाळीने तेणे पोतानुं सघळुं धन नव क्षेत्रोमां वापर्युं. ॥ ५१ ॥ निबिड ( घणारूप ) तपथी संसाररूपी पांजरांने भांगवानी इच्छाथी स्त्रीथी विरक्त थइने तेणे सुमति नामना गुरुनी पासे दीक्षा लीधी. ॥ ५२ ॥ (अनुक्रमे) अग्यारे अंगोनो पारंगामी एवो ते धर्मदत्तमुनि तपपूर्वक पृथ्वीपर विहार करतोथको पोतानी (जन्मभूमि ) एवी वाराणसी नगरीमां गयो. ॥ ५३ ॥ त्यां वंदनमाटे आवेला लोकोने उपदेश देतोथको ते मुनि श्रीजैनधर्मनुं एक छत्रवाळुं साम्राज्य विस्तारवा लाग्यो. ॥ ५४ ॥ घणा काळथी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ववंदे यशोधरः ॥ ५५ ॥ वेषान्यत्वाच्च कार्श्याच्च । ताभ्यामनुपलक्षितः ॥ प्रतीत्य पितरौ तेने । व्याख्यामेष विशेषतः ॥ ५६ ॥ ततस्तौ मुनिना दीन—वदनौ दुःखकारणं ॥ पृष्टौ पुत्रवियोगार्त्ति—मेव चक्रतुरुत्तरं ॥ ५७ ॥ मुनिः प्रोवाच वां स्नेहः । कोऽयमस्मिंस्तनूरुहे ॥ प्राप्तेषु पुत्रतां नाना—जीवैरखिलजंतुषु ॥ ५८ ॥ तथापि यदि वां पुत्र—प्रेम्णा विह्वलितं मनः ॥ तदा मामेव तं धर्म—दत्तं जानीतमात्मजं ॥ ५९ ॥ ततः स्वरवयोऽवस्था—विशेषैरुपलक्ष्य तं ॥ ऊचतुः किमेतत्त्व-

---

पुत्रना वियोगथी दुःखी थयेला यशोधरशेठे पोतानी स्त्रीसहित कणवार दुःख विसारवामाटे (त्यां आवी) मुनिने वांद्या. ॥ ५५ ॥ वेष बदलाइ जवाथी तथा दुर्बलताथी तेओ तेने ओळखी शक्या नहि, परंतु मुनि तो तेओने ओळखीने विशेष प्रकारे व्याख्यान विस्तारवा लाग्या. ॥ ५६ ॥ पछी दीनमुखवाळा एवा तेओने मुनिए दुःखनुं कारण पूछवाथी तेओए पण पुत्रवियोगना दुःखरूपी उत्तर आप्यो. ॥ ५७ ॥ मुनिए कह्युं के नानाप्रकारना जीवोमां सर्व प्राणीओने ज्यारे पुत्रपणुं प्राप्त थाय छे त्यारे वळी ते पुत्रमां तमारे स्नेह करवो शुं कामनो छे? ॥ ५८ ॥ तो पण पुत्रना प्रेम-थी जो तमारुं मन व्याकुल थतुं होय तो पछी आ मनेज पोतानो पुत्र धर्मदत्त तमारे जाणी ले-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

याऽकारी–त्युच्चकैस्तावरोदितां ॥ ६० ॥ तयोश्चात्रबोधाय । शिक्षामेवमदान्मुनिः ॥ युवयोर्न वयो धर्म–योग्यं मोहमथार्हति ॥ ६१ ॥ धनं सनिधनं प्रांते । वनिता जनितार्त्तयः ॥ भोगा रोगास्पदं कूट—कोटीकटुकुटुंबकं ॥ ६२ ॥ हंत किं तद्भवे येन । भवेदसुमतां धृतिः ॥ उत्खातपातकोद्रेक—मेकमेव हितं व्रतं ॥ ६३ ॥ युग्मं ॥ प्राप्य रत्नत्रयं पुत्रः । संयमश्रीसमान्वितः ॥ किं दूरादहमायातो । न जातो भवतोर्मुदे ॥ ६४ ॥ बोधितौ तौ ततस्तेन । तृणवत्त्यक्तसंपदौ ॥ मुनेः पार्श्वे ज-

वो. ॥ ५९ ॥ पछी स्वर उमर तथा अवस्थाविशेषथी तेने ओळख्याबाद अरे पुत्र! तें आ शुं कर्युं! एम कही तेओ मोटेथी रडवा लाग्या. ॥ ६० ॥ पछी तेओने प्रतिबोधवामाटे मुनिए उपदेश आप्यो के हवे तमारी आ धर्मलायक उमर मोह करवामाटे योग्य नथी. ॥ ६१ ॥ धन अंते विनश्वर छे, स्त्रीओ दुःख आपनारी छे, भोगो रोगोना स्थानसरखा छे, तथा कुटुंब पण क्रोडोगमे कूटोथी कडवुं छे. ॥ ६२ ॥ अरे! आ संसारमां एवी कइ वस्तु छे? के जेथी प्राणीओने धीरज मळे! माटे पापोना जथाने उखेडनारुं व्रत लेवुं एज एक हितकारी छे. ॥ ६३ ॥ हुं तमारो आ पुत्र के जे दूर देशथी त्रण रत्नो लेइने संयमलक्ष्मीसहित आवेलो छुं, ते शुं तमोने हर्ष करना-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

श्रद्दतु—र्व्रतं वैराग्यशालिनौ ॥ ६५ ॥ त्रयोऽपि तपसा तेऽग्नि—त्रयीतुलिततेजसः ॥ दग्धकर्मेंधनाः काले । लेभिरे परमं पदं ॥ ६६ ॥ एवं तात कृतातंकं । श्रुत्वा वृत्तं कुयोषितां ॥ अपरीक्ष्य कथं कन्या—माद्रियंते महाधियः ॥ ६७ ॥ निश्चलः स्नेहलः कोऽत्र । कः प्रकाशो निरंतरः ॥ को वा सर्वोत्तमो लाभः । किं च रूपमविस्नसं ॥६८॥ एवं प्रश्नानि चत्वारि । या तु प्रत्युत्तरिष्यति ॥ तात सा तत्वतः प्राण—वल्लभा मे भविष्यति ॥ ६९ ॥ इत्यस्य निश्चयं मत्वा । समुद्रो न्यगदत्तरां ॥

रो नथी थतो? ॥ ६४ ॥ एवी रीते मुनिए प्रतिबोध आप्याथी तेज बन्ने पण वैराग्यथी शोभता-थका तृणनी माफक संपदा तजीने दीक्षा लेता हवा. ॥ ६५ ॥ पछी अग्नित्रयसरखा तेजवाळा तेज त्रणे कर्मरूपी काष्टो बाळीने मोक्षपद पाम्या. ॥ ६६ ॥ एवी रीतनुं दुराचारी स्त्रीनुं भयंकर वृत्तांत सांभळीने हे पिताजी! बुद्धिवानो परीक्षा कर्याविना कन्यानो केम स्वीकार करे? ॥ ६७ ॥ अहीं निश्चल स्नेही कोण? निरंतर प्रकाश कयो? तथा सर्वोत्तम लाभ कयो? अने अविनश्वर रूप कयुं? ॥ ६८ ॥ हे पिताजी! एवी रीतनां मारां आ चार प्रश्नोनो जे उत्तर आपशे ते तत्वथी मारी प्राणवल्लभा स्त्री थशे. ॥ ६९ ॥ एवी रीतनो तेनो निश्चय जाणीने समुद्रदत्ते कह्युं के, हे वत्स

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मा भूः कदाग्रही वत्स । विलंबः खलु कार्यहा ॥ १० ॥ संबंधी सागरः कन्या । सुभद्रा स्वजना अमी ॥ पुनरेतत्त्रयीयोगो । मया वत्स क लप्स्यते ॥ ११ ॥ सुरेंडोऽवग् वृथा स्यान्मे । नोक्तं किं चिंतयानया ॥ यः पाणिमसृजत्पाणि—गृहीतीमपि स ध्रुवं ॥ १२ ॥ यत्तत्प्रजल्पनं यत्त—द्भक्षणं यत्तदासनं ॥ बाल एव प्रकुर्वाणो । विभाति न पुनर्युवा ॥ १३ ॥ बलात्कारेण वीवाहः । कारितो न शुभायतिः ॥ इति ध्यात्वा न्यवर्त्तत । स्वयमाप्तनरास्ततः ॥ १४ ॥ विवाहविघ्नं तेऽभ्येत्य । साग-

---

तुं कदाग्रही न था, केमके (आवां कार्यमां) विलंब करवाथी कार्य बगडी जाय छे. ॥ १० ॥ केमके हे वत्स! सागरशेठजेवो संबंधी, सुभद्राजेवी कन्या तथा आवा स्वजनो, ए त्रणेनो योग फरीने हुं क्यां मेळवीश? ॥ ११ ॥ त्यारे सुरेंद्रदत्ते कह्युं के हे पिताजी! मारुं वचन वृथा थशे नहि, वळी आम चिंता करवाथी शुं थशे? केमके जेणे मारो हाथ सरज्यो छे, ते खरेखर हाथने ग्रहण करनारी पण सरजशे. ॥ १२ ॥ जे ते बोलवुं, जे ते खावुं तथा ज्यां त्यां बेसवुं, ए बालकने शोभे छे, परंतु युवानने शोभे नहि. ॥ १३ ॥ हवे बलात्कारे करावेलो विवाह परिणामे सारो निवडतो नथी, एम विचारी ते आप्त पुरुषो पोतानी मेळेज त्यांथी पाछा गया. ॥ १४ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

श्रेष्ठिनः पुरः ॥ प्रश्नानि च सुभद्रायां । छन्नं दत्तश्रुतौ जगुः ॥ १५ ॥ एतज्ज्ञातमभूत् पूर्वं । हा सख्यः किं भविष्यति ॥ इति पूत्कुर्वती बाला । व्यालात्तेव रुरोद सा ॥ १६ ॥ तदा तैरार्हतैर्देवै-र्वितेने व्योमनीति वाक् ॥ मा शोचीः पुत्रि तिष्ठाम—स्तव संनिहिता वयं ॥ १७ ॥ तत्सांनिध्या-दनध्यायं । विषादस्य विधाय सा ॥ सद्यः प्रश्नोत्तरश्लोकं । पूर्वाधीतमिवापठत् ॥ १८ ॥ निश्चलस्ने-हलो धर्म—श्चित्प्रकाशो निरंतरः ॥ विद्या सर्वोत्तमो लाभः । शीलं रूपमविस्रसं ॥ १९ ॥ लिखि-

---

तेओए आवीने सागरशेठने विवाहना विघ्न संबंधि वृत्तांत कह्यो, तथा ते प्रश्नो पण कह्यां, ते वखते त्यां गुप्त रहेली सुभद्राए पण ते सघळुं सांभळ्युं. ॥१५॥ हे सखीओ में तो पहेलेथीज आम थवानुं जाण्युं हतुं, हवे शुं थशे? एम पोकार करती ते बालिका जाणे अजगरे पकडी होय नहि तेम रडवा लागी. ॥ १६ ॥ ते वखते ते जैनी देवोए एवी रीतनी आकाशवाणी करी के, हे पुत्रि! तुं शोक कर नहि, अमो तने सहाय करनारा तैयार उभा छीये. ॥ १७ ॥ हवे तेओना सहायथी शोक तजीने जाणे पहेलेथीज भणी राख्यो होय नहि तेम तुरत प्रश्नोना उत्तरनो श्लोक ते बोली के, ॥ १८ ॥ निश्चल स्नेहवाळो धर्म छे, निरंतर प्रकाशवाळुं ज्ञान छे, विद्या ए स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वासौ तया श्लोकः । स्वसखीभ्यः समर्पितः ॥ हर्षवीचीविहस्ताभि—स्ताभिस्तज्जनकाय च ॥८०॥ हस्ताद्धस्तेन संचारी । तनयः श्रीपतेरिव ॥ अयत्नं स समुद्रस्य । द्राग् ययौ कर्णगोचरं ॥ ८१ ॥ पितुः पार्श्वे निषण्णेन । सुरेंद्रेण प्रवाचितः ॥ श्लोकौ लोकोत्तरानंद—वारिधेश्चंद्रतां दधौ ॥ ८२॥ दध्यौ सामुद्री बालाया । अप्यस्याः कीदृशी मतिः ॥ वयोवृद्धा अपि यया । मूर्धानं धूनिता न के ॥ ८३ ॥ किंचिल्लोचनमस्त्यस्या । नूनं नेत्रद्वयाधिकं ॥ येनेतरैर्दुरालोका—नर्थानेवं निरीक्षते

र्वथी उत्तम लाभ छे, तथा शील ए अविनश्वर रूप छे. ॥ ७९ ॥ पछी ते श्लोक लखीने तेणीए पोतानी सखीओने आप्यो, तथा हर्षना मोजांओथी प्रेरायेली एवी तेओए ते श्लोक तेणीना पिताने आप्यो. ॥ ८० ॥ एवी रीते धनवानना पुत्रनीपेठे एकना हाथमांथी बीजाना हाथमां जतो एवो ते श्लोक प्रयत्नविनाज समुद्रदत्तशेठने काने गयो. ॥ ८१ ॥ त्यारे पितापासे बेठेला सुरेंद्रदत्ते पण वांचेलो एवो ते श्लोक तेना अनुपम आनंदरूपी समुद्रप्रते चंद्रपणाने धारण करवा लाग्यो. ॥ ८२ ॥ हवे ते सुरेंद्रदत्त विचारवा लाग्यो के अहो! आ बालिकानी पण केवी बुद्धि छे! के जेथी कया वृद्धने पण पोतानुं मस्तक नथी धुणाववुं पड्युं! ॥ ८३ ॥ खरेखर तेणीनी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ८४ ॥ तृणानीव सरस्वत्या—स्तरंत्युपरि नूरयः ॥ हृदयग्राहिणस्तस्याः । सुवंश्या एव केचन ॥
॥ ८५ ॥ नूनमेवंविधोक्तीनां । नाजनं सा गुणास्पदं ॥ अस्यामपि न रज्ये चे—त्तन्मत्तः कोऽपरः
पशुः ॥ ८६ ॥ इति विज्ञाय पुत्रस्या—निप्रायं तत्कृते कृती ॥ सुनद्रां प्रीतिपूरेण । समुद्रः प्रत्यप-
द्यत ॥ ८७ ॥ श्रुते तस्मिन् व्यतिकरे । सागरो मुमुदेतरां ॥ मन्यमाना सुनद्रापि । फलितं स्वम-

पासे आ कुदरती बे लोचन शिवाय त्रीजुं पण कइंक लोचन होवुं जोइये, के जेथी ते बीजा-उने अगम्य एवा पण अर्थोने जोइ शके ने. ॥ ८४ ॥ घासनीपेठे सरस्वतीनी ( ते नामनी न-दीनी ) उपर उपर तो घणाउ तरे ने, परंतु तेणीना सारने ( तलीयांने ) ग्रहण करनारा तो कोइक कुलीनज ( उत्तम जातिना वांसज ) होइ शके ने. ॥ ८५ ॥ माटे खरेखर एवी रीतनां वचनोना नाजनसरखी ते सुनद्रा गुणोना स्थानरूप ने, अने हवे आ सुनडामां पण जो हुं खु-शी न थउं तो पनी माराथी बीजो कयो पशुसमान ने? ॥ ८६ ॥ हवे एवी रीतनो पुत्रनो अ-निप्राय जाणीने कृतार्थ थयेला समुद्रदत्ते हर्षपूर्वक तेनेमाटे सुनडानो स्वीकार कर्यो. ॥ ८७ ॥ ते वृत्तांत सांनलवाथी सागरशेठ पण अत्यंत खुशी थयो, अने सुनद्रा पण पोतानो मनोरथ फ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नोरथं ॥ ८८ ॥ अथ द्वयोस्तयोर्गेहे । प्रारेभे वनिताजनः ॥ कर्म वैवाहिकं सर्वं । स्फुरध्धवलमंग-
लं ॥ ८९ ॥ पुनः पुनर्मनोदूती—कृत्य निर्विण्णयोर्मिथः ॥ वरवध्वोरगुर्दुःख–मंगुल्या गणिता दिनाः
॥ ९० ॥ अथ लग्नक्षणे स्नातः । संवीतः शुचिवाससी ॥ विलिप्तश्चंदनैर्दिव्यै—र्मण्डितो मणिभूषणैः
॥ ९१ ॥ आरूढस्तुरगं भूरि—श्रीकरीवारितातपः ॥ गीतोंगनाभिः परितः । परीतः पौरमंडलैः ॥
॥ ९२ ॥ सागरस्य गृहद्वारं । प्राप्तो वातायनस्थया ॥ वरः सखीप्रेरितया । संबभाषे सुभद्रया ॥९३॥

---

ठेलो मानीने आनंद पामी. ॥ ८८ ॥ हवे तेओ बन्नेने घेर स्त्रीओ धवलमंगलसहित विवाहनां कार्यो करवा लागी. ॥ ८९ ॥ फरी फरीने मनने दूतरूप करीने परस्पर थाकेला एवा ते बन्ने वर-वहुना आंगलीए गणेला दिवसो व्यतीत थया. ॥ ९० ॥ हवे लग्नवखते स्नान करीने, पवित्र व-स्त्रो पहेरीने चंदनथी विलेपन करीने, तथा दिव्य रत्नजडित आभूषणो पहेरीने ॥ ९१ ॥ घोडापर चडेलो तथा घणी छत्रीओथी दूर करेल छे सूर्यनो ताप जेणे एवो, चारे बाजुथी जेने स्त्रीओ गी-त गाइ रही छे एवो, तथा नगरना लोकोना समूहथी वेरायेलो ॥ ९२ ॥ सुरेंद्रदत्त ( अनुक्रमे ) सागरशेठना घरना दरवाजापासे आव्यो, त्यारे झरुखामां बेठेली तथा सखीओए प्रेरेली एवी सु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वरराज न राजंते । म्बरेण महाधियः ॥ श्रिये च दाक्ष्यमेवैकं । तदद्य ज्ञास्यते तव ॥ ८४ ॥ वद क्रूरं समाख्यांति । कं पृथिव्यंबुचारिषु ॥ कं वा प्रसुप्तराजीव—राजीजागरणक्षमं ॥ ८५ ॥ अत्राहिमकरमिति । प्रोत्तरय्याभ्यधत्त सः ॥ कृते प्रतिकृतं कुर्या—दिति वाक्यं स्मरन्निव ॥ ८६ ॥ पृच्छकाः संति भूयांसो । दुर्लभास्तूत्तरप्रदाः ॥ एकं प्रश्नोत्तरं ब्रूहि । मम त्वमपि धीमति ॥८७॥ अ-

जडाए ते वरराजाने कह्युं के, ॥ ८३ ॥ हे वरराजा! महाबुद्धिवानो कंइ आडंबरथी शोभता नथी, फक्त एक चतुराइज शोभा करनारी छे, अने ते तमारी चतुराइ हवे मालुम पडशे. ॥८४॥ तमो कहो के भूचर तथा जलचरनेविषे क्रूर कोने कहे छे? तथा बीडायेलां कमलोनी श्रेणिने प्रफुल्लित करवाने कोण समर्थ छे? ॥ ८५ ॥ त्यारे तेणे उत्तर आप्यो के, 'अहिमकर' अहि एटले सर्प ए भूचरोमां तथा मकर एटले मगरमछ ए जलचरोमां क्रूर छे, तथा 'अहिमकर' एटले सूर्य ए कमलोने विकस्वर करे छे. हवे 'करेला प्रते सामुं करवुं' एवां वाक्यने याद करनारीपेठे सुरेंद्रदत्त पण बोल्यो के, ॥ ८६ ॥ पूछनारा तो घणा होय छे, परंतु तेनो उत्तर देनारा दुर्लभ होय छे, माटे हे बुद्धिवाळी! तुं पण मारा एक प्रश्ननो उत्तर कहे? ॥ ८७ ॥ अहिं केवो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अपोहतीह संदेह-संदोहं कीदृशो गुरुः ॥ लूकाभिहतलोकानां । को वा संजिवनौषधं ॥ ९८ ॥
घनागम इति प्रश्न-स्योत्तरं प्रवितीर्य सा ॥ ऊचे दिवापि संकोचं । जजत्यंभोरुहं कुतः ॥ ९९ ॥
सोऽवग्र मध्ये सरः स्नांत्या । मुखं वीक्ष्य मृगीदृशः ॥ दिवापि संकुचत्यंभो—रुहं चंद्रोदयभ्रमात् ॥
॥ ४०० ॥ सापि त्रिदशसाहाय्यात् । पटुंमन्यान्यधादयं ॥ वद किं दीयते दीपो । वक्रग्रीवं महेल-
या ॥ १ ॥ दूरस्थदयितध्यान-द्वारदश्रुनिपाततः ॥ भीतया दीयते दीपो । वक्रग्रीवं महेलया ॥२॥

---

गुरु संदेहनो समूह दूर करे? अथवा लूथी हणाएला लोकोने जीवाडनारां औषधसरखुं कोण छे? ॥ ९८ ॥ 'घनागम' एटले जेने घणुं ज्ञान छे एवो गुरु, तथा वरसादनुं आववुं, एवो उत्तर आपीने वळी ते बोली के दिवसे पण कमल शामाटे संकोचाय छे? ॥ ९९ ॥ सुरेंद्रदत्ते कह्युं के तळावमां स्नान करती युवतीनुं मुख जोइने चंद्रोदयना भ्रमथी दिवसे पण कमल संकोचाय छे. ॥ ४०० ॥ पछी देवनी सहायताथी पोताने पंडित मानती सुभद्रा पण बोली के तमो कहो के स्त्री वांकी डोक राखीने शामाटे दीवो आपे छे? ॥ १ ॥ देशांतर गयेला (पोताना) स्वामीना ध्यानथी खरतां आंसु पडवानी बीकथी स्त्री वांकी डोक राखीने दीवो आपे छे. ॥२॥ एवी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एतां प्रत्युत्तरय्यैवं । तुरगादुत्तरन्नसौ ॥ मेने सुयोषिल्लाभेन । स्वं विश्वोपरिवर्त्तिनं ॥ ३ ॥ तत्वत-
स्तद्वचोभंग्या । सिद्धार्घ्यप्रक्रियो वरः ॥ अर्घ्यं श्वश्रूकृतमपि । प्रत्यैद्व्यवहारतः ॥ ४ ॥ ततः सर्वा-
गशृंगार—सुभगां कमलामिव ॥ अच्युतश्रीरुपायंस्त । क्षणे सल्लक्षणे स तां ॥ ५ ॥ धनकोटीर-
सौ लेभे । श्वशुरात्करमोचने ॥ करस्य ग्रहणादाढ्यी—भवंतं भूपतिं हसन् ॥ ६ ॥ महोत्सवैः समं
वध्वा । समेतः स स्ववेश्मनि ॥ अभुंक्त सततं भोगान् । मनुष्योऽप्यमरोपमान् ॥ ७ ॥ पूर्वं परी-

रीते तेणीने उत्तर आपीने घोडापरथी उतरतो एवो ते उत्तम स्त्री मळवाथी पोताने जगतमां स-
र्वथी श्रेष्ठ मानवा लाग्यो. ॥ ३ ॥ तत्वथी तो ते ते वचनभंगीथी थयेल छे अर्घ्यक्रिया जेनी ए-
वा ते वरराजाए सासुए करेला अर्घ्यने पण व्यवहारथी स्वीकार्युं. ॥ ४ ॥ पछी सर्व शरीरे शृंगार
करवाथी मनोहर लक्ष्मीसरखी ते सुभद्राने अखंडित शोभावाळो ( विष्णुनी शोभावाळो ) ते सु-
रेंद्रदत्त उत्तम क्षणे परण्यो. ॥ ५ ॥ कर लेवाथी धनवान थता राजानी पण हांसी करता एवा ते-
णे ससरापासेथी हस्तमोचनसमये क्रोडोगमे धन मेळव्युं. ॥ ६ ॥ पछी महोत्सवपूर्वक स्त्रीसहित
पोताने घेर आवीने मनुष्य छतां पण ते देवसरखा भोगो हमेशां भोगववा लाग्यो. ॥ ७ ॥ प-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्षितान्योऽन्य-कलाकौशल्ययोस्तयोः ॥ बिभिदे न मनः प्रीति—तंतुस्यूतमिव क्वचित ॥ ८ ॥ ए-
कचित्तौ कदाचित्तौ । समस्यान्योक्तिभंगिभिः ॥ जल्पाकौ जीवभारत्यो—र्भ्रमं कस्य न तेनतुः ॥
॥ ९ ॥ कदापि स्वादयंतौ तौ । मिथः सारकथारसं ॥ घ्रातावित्र न जज्ञाते-ऽशनवेलां गतामपि
॥ १० ॥ अन्योऽन्यजीवितैश्वर्यं । पणीकृत्य कदाचन ॥ तौ प्रीतिसारिकापाशैः । सारिपाशैरदीव्यतां
॥ ११ ॥ एवमन्योऽन्यकेलीभिः । प्रियप्रेम्णा च मोहिता ॥ सुभद्रा तद्विसस्मार । यत्प्रपन्नं जिनाग्र-

---

हेलेथीज परस्पर कलाकौशल्यनी परीक्षा करवाथी तेउ बन्नेनुं मन जाणे प्रीतिरूपी दोराथी सीवेलुं होय नहि तेम कोइ पण बाबतमां जूदुं पडयुं नहि. ॥ ८ ॥ कोइक वखते एकमनवाळा तेउ बन्ने समस्या तथा अन्योक्तिथी बोलताथका कोने बृहस्पति तथा सरस्वतीनो भ्रम न उपजावता? ॥९॥ कोइक वखते परस्पर उत्तम कथाना रसनो स्वाद लेता एवा तेउ बन्ने जाणे धराइ गया होय नहि तेम वीती गयेली भोजनवेळाने पण न जाणवा लाग्या. ॥ १० ॥ एवी रीतनी परस्पर क्रीडाथी तथा स्वामिना प्रेमथी मोहित थयेली सुभद्रा जे जिनेश्वरप्रभुपासे नियम लीधो हतो ते विसरी गइ. ॥ ११ ॥ घणा काळसुधि वियोग सहन कर्याबाद मळेला भोगोमां लोलुप थयेली

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

